# 2020

## SANSKRIT — HONOURS

**Paper : CC-11**

**Full Marks : 65**

*The figures in the margin indicate full marks.*

*Candidates are required to give their answers in their own words as far as practicable.*

**All answers are to be given in Sanskrit using Devanāgarī script, if not mentioned otherwise.**

**Section – A**

**Unit - I**

**(Marks : 30)**

1. निम्नोद्धृतेषु यथाभिमतं ***मन्त्रद्वयस्य*** वङ्गभाषायाम् आङ्गलभाषायां वा अनुवादः करणीयः। 5×2

(a) अग्निना रयिमश्नवत्
पोषमेव दिवेदिवे।
यशसं वीरवत्तमम्॥

(b) प्रा वेपा मा बृहतो मादयन्ति
प्रवातेजा ईरिणे ववृतानाः।
सोमस्येव मौजवतस्य भक्षो
विभीदको जागृविर्मह्यमच्छान्॥

(c) येन द्यौरुग्रा पृथिवी च दृल्हा
येन स्वः स्तभितं येन नाकः।
यो अन्तरिक्षे रजसो विमानः
कस्मै देवाय हविषा विधेम॥

(d) अहमेव स्वयमिदं वदामि
जुष्टं देवेभिरुत मानुषेभिः।
यं कामये तंतमुग्र कृणोमि
तं ब्रह्माणं तमृषिं तं सुमेधाम्॥

**2.** निम्नोद्धृतेषु यथाभिमतं कस्यचि***देकस्य*** मन्त्रस्य सप्रसङ्गं व्याख्या कार्या। 8×1

(a) अ॒ग्निः पूर्वे॑भि॒र्ऋषि॑भि॒–
रीड्यो॒ नूत॑नैरु॒त।
स दे॒वाँ एह व॑क्षति॥

(b) द्वेष्टि॑ श्व॒श्रूरप॑ जा॒या रु॑णद्धि
न ना॑थि॒तो वि॑न्दते मर्डि॒तार॑म्।
अश्व॑स्येव॒ जर॑तो वस्न्य॑स्य॒
नाहं वि॑न्दामि कित॒वस्य॒ भोग॑म्॥

(c) हि॒र॒ण्य॒ग॒र्भः सम॑वर्त॒ताग्रे॑
भू॒तस्य॑ जा॒तः पति॒रेक॑ आसीत्।
स दा॑धार पृथि॒वीं द्यामु॒तेमां
कस्मै॑ दे॒वाय॑ ह॒विषा॑ विधेम॥

***अथवा***

अधोलिखितेषु सन्दर्भेषु यथाभिलाषम् ***एकतमस्य*** व्याख्या कार्या। 8×1

(a) तत्र 'अग्निमीळे' इति सूक्तं प्रातरनुवाक आग्नेये क्रतौ विनियुक्तम्।

(b) आधाने तृतीयेष्टौ प्रथमाज्यभागस्यानुवाक्या।

(c) प्राजापत्यस्य पशोर्वपापुरोडाशहविषां क्रमेणादितस्तिस्रोऽनुवाक्यास्ततस्तिस्रौ याज्याः।

**3.** (a) अ॒ग्निर्होता॑ क॒विक्र॑तुः
स॒त्यश्चि॒त्रश्र॑वस्तमः।
दे॒वो दे॒वेभि॒राग॑मत्॥

– मन्त्रोऽयम् ऋग्वेदस्य कस्मिन् मण्डले समाम्नातः? कोऽत्र ऋषिः, किं वा छन्दः? कविक्रतुशब्दस्य कोऽर्थः? चित्रश्रवस्तमशब्दस्य वा कोऽर्थः? मन्त्रेऽस्मिन् स्तुतायाः देवतायाः स्वरूपवैशिष्ट्यं पर्यालोच्यताम्।
1+1+1+1½+1½+6

***अथवा***

(b) देवीसूक्तस्य नामान्तरं किम्? सूक्तमिदम् ऋग्वेदस्य कस्मिन् मण्डले आम्नातम्? कोऽत्र ऋषिः, का वा देवता? सूक्तेऽस्मिन् कति मन्त्राः सन्ति? तेषां मन्त्राणां विशेषतामुल्लिख्य सूक्तस्यास्य दार्शनिक-तात्पर्यं विस्पष्टीक्रियताम्।
1+1+½+½+1+2+6

### Unit - III

### (Marks : 10)

**4.** (a) अधोलिखितयोः मन्त्रयोः वङ्गभाषायाम् आङ्गलभाषायां वा अनुवादः करणीयः। 5×2

(i) अनुव्रतः पितुः पुत्रो मात्रा भवतु संमनाः।
जाया पत्ये मधुमतीं वाचं वदतु शान्तिवाम्॥

(ii) येन देवा न वियन्ति नो च विद्विषते मिथः।
तत् कृण्मो ब्रह्म वो गृहे संज्ञानं पुरुषेभ्यः॥

***अथवा***

(b) अधोलिखितेषु यथाभिमतम् ***एकतरस्य*** मन्त्रस्य सप्रसङ्गं व्याख्या कार्या। 10×1

(i) सहृदयं सांमनस्यमविद्वेषं कृणोमि वः।
अन्यो अन्यमभि हर्यत वत्सं जातमिवाघ्न्या॥

(ii) समानी प्रपा सह वोऽन्नभागः
समाने योक्त्रे सह वो युनज्मि।
सम्यञ्चोऽग्निं सपर्यतारा
नाभिमिवाभितः॥

***अथवा***

(c) अथर्ववेदस्य कस्मिन् काण्डे भूमिसूक्तं विलसति? किं चास्य सूक्तस्य नामान्तरम्? भवदीय-पाठ्यांशमवलम्ब्य सूक्तस्यास्य उपजीव्यं काव्यसौन्दर्यं च पर्यालोच्यताम्। 1+1+6+2

## Section – C

### Unit - I

### (Marks : 10)

**5.** (a) अधोलिखितयोः वङ्गभाषायाम् आङ्गलभाषायां वा अनुवादः करणीयः। 5×2

(i) कलिः शयानो भवति संजिहानस्तु द्वापरः।
उत्तिष्ठंस्त्रेता भवति कृतं संपद्यते चरंश्चरैवेति॥

(ii) तस्य ह त्रयः पुत्राः आसुः, शुनःपुच्छः शुनःशेपः शुनोलाङ्गुल इति। तं होवाच– ऋषेऽहं ते शतं ददाम्यहमेषामेकेनात्मानं निष्क्रीणा इति। स ज्येष्ठं पुत्रं निगृह्णान उवाच, नन्विममिति, नो एवेममिति कनिष्ठं माता; तौ ह मध्यमे संपदयांचक्रुः शुनःशेपे, तस्य ह शतं दत्त्वा स तमादाय सोऽरण्याद् ग्राममेयाय।

***अथवा***

(b) अधोलिखितेषु यथाभिलाषम् ***एकतरस्य*** सप्रसङ्गं व्याख्या कार्या। 10×1

(i) ऋणमस्मिन् संनयत्यमृतत्वं च गच्छति।
पिता पुत्रस्य जातस्य पश्येच्चेज्जीवतो मुखम्॥

(ii) चरन् वै मधु विन्दति चरन् स्वादुमुदुम्बरम्।
सूर्यस्य पश्य श्रेमाणं यो न तन्द्रयते चरंश्चरैवेति॥

***अथवा***

(c) मनुमत्स्यकथा कस्मिन् ब्राह्मणे समुपलभ्यते? तच्च ब्राह्मणं कस्मिन् वेदे आम्नातम्? भवदीयपाठ्यांशमवलम्ब्य आख्यानमिदम् उपस्थाप्यताम्। 1+1+8

**Unit - II**

**(Marks : 15)**

**6.** निम्नोद्धृतेषु ***एकतमस्य*** सप्रसङ्गं व्याख्या कार्या। 7×1

(a) मनसैवानुद्रष्टव्यं नेह नानाऽस्ति किञ्चन।
मृत्योः स मृत्युमाप्नोति य इह नानेव पश्यति॥

(b) यदा सर्वे प्रमुच्यन्ते कामा येऽस्य हृदि श्रिताः।
अथ मर्त्योऽमृतो भवत्यत्र ब्रह्म समश्नुते।

(c) येनाहं नामृता स्यां किमहं तेन कुर्याम्?

**7.** (a) उपनिषद् इति शब्दस्य कोऽर्थः? बृहदारण्यकोपनिषदः प्रतिपाद्यो विषयः संक्षेपेण आलोच्यताम्। 2+6

***अथवा***

(b) बृहदारण्यकोपनिषद् कस्मिन् वेदे समाम्नाता? अस्या उपनिषदः कस्मिन्नध्याये जीवात्मनः उत्क्रान्तिरुपवर्णिता? बृहदारण्यकोपनिषदमवलम्ब्य जीवात्मनः उत्क्रान्तिः सविशदम् आलोच्यताम्। 1+1+6